(६,२,२,२३) शत०ब्रा० वचनात् । उखा चोपलक्षणम् अषाढाद्यप्यत्र सम्भ्रियतएव ततश्चान्तराले तस्या अपि प्रयोक्तृत्वम् । सम्प्रदायस्तु फाल्गुनकृष्णाष्टम्याम्" कर्कः "आहवनीयस्य पुरस्तान्मत्या चतुरश्रे श्वभ्रे मृत्पिण्डमवदधाति भूमिसमम्" २सू० । "भूमिसममन्यूनानतिरिक्तम्"क०। "पिण्डमपरेण व्यध्वे वल्मीकवपां छिद्रां निदधाति"३सू०। 'पिण्डाहवनीययोर्व्यध्वे अर्धपथे"क०। "व्यध्वे पिण्डाहवनीययोर्मध्ये, वल्मीकवपाम् उपदीकाकृतस्य मृच्चयस्य वपामिव वपाम् अन्तःपुटां छिद्रां छिद्रसंयुक्ताम्" संग्र० । "आहवनीयं दक्षिणेन त्रिवृन्मुञ्जपञ्चाङ्गीबद्धास्तिष्ठन्ति प्राञ्चोऽश्वगर्दभाजाः पूर्वापरा रासभोमध्येऽश्वपूर्वाः" ४सू० । "आहवनीयस्य दक्षिणतः त्रिवृद्भिर्मुञ्जमयीभिः पञ्चाङ्गीभिः पञ्चाङ्ग्यो मुखरिकाः ताभिर्बद्धास्तिष्ठन्ति प्राङ्मुखाः अश्वगर्द्दभाजाः पूर्वापररीत्या रासभोमध्येऽश्वपूर्वाः" क० । "उत्तरत आहवनीयस्यारत्निमात्र उभयतस्तीक्ष्णा वैणवी सुषिराभ्रिः कल्माष्यभावेऽकल्माषी प्रादेशमात्र्यरत्निमात्री वा" ५सू० । "आनन्तर्य्यात्पशूनामुत्तरतो मा भूदित्याहवनीयग्रहणम्"क० । "परिपाकवशात्कर्बुरा" संग्र०। "हिरण्मयीमेके" ६सू०। "एके आचार्य्या इच्छन्ति, अतश्च विकल्पः" क० । "अष्टगृहीतं जुहोति संततमुद्गृह्णन् युञ्जान इति (११,१) ७सू० । 'अष्टगृहीतमाज्यद्रव्यं संततं जुहोति" क० । 'देवस्य त्वेति (११,३) अभ्रिमादाय "हस्त आधायेत्येनामभिमन्त्रयते" । (११,११) ८सू० । "अश्वप्रभृतींश्च प्रत्यृचं प्रतूर्त युञ्जाथां योगे योगऽइति (११,१२,१४) ९सू० । "अभिमन्त्रयते" क० । "अनुपस्पृशन्नुत्क्रमयत्येनान् प्राचः प्रतिमन्त्रं प्रतूर्वन्नुर्वन्तरिक्षं पृथिव्याः सधस्थादिति" (११,१५,१६) १० सू० । "अग्निषु ज्वलत्सु पिण्डं गच्छन्त्यग्निं पुरीष्यमिति" (११,१६) । (६,३,३,१) शत०ब्रा० ११सू० । "दक्षिणतश्च पशवो युगपत्" १२सू० । "गच्छतां च दक्षिणतः पशवः, उत्तरतश्च पुरुषाः युगपद्गमनं कुर्वन्ति"क० । "अनड्वा पुरुषमीक्षते देवपितृमनुष्यानर्थकमग्निं पुरीष्यमिति" । (११,१६) १३सू० । "यो देवादीन्नावति स देवपितृमनुष्यार्थनकः" क० । "वल्मीकवपामादाय छिद्रेण पिण्डमीक्षतेऽन्वग्निरिति" (११,१७) १४सू०। "दृष्ट्वा निदधात्येनाम् । १५सू०। "वल्मीकवपाम्" क०। "आगत्येत्यभिमन्त्रयतेऽश्वम्" (११,२८) १६सू० । "आक्रम्येत्येनेन (११,१९) पिण्डमधिष्ठापयति" १७ सू० । "एनेनेत्यश्वोऽभिधीयते" क० "द्यौस्त इति (११,२०) पृष्ठस्योपरि पाणिं धारयन्ननुपस्पृशन्नुत्क्रामेत्युत्क्रामयति (११,२१) १८सू० । "अश्वम्" क० । "उदक्रमीदित्यभिमन्त्रयते (११,२२) १९ क०।"अश्वमेव"क०।"आहवनीयवत् स्थापयति पिण्डस्य" २०सू० । "पशून्" क० "उपविश्य मृदमभिजुहोत्या त्वा जिघर्मीति (११,२३) 'व्यतिषक्ताभ्यामृग्भ्यामाहुती (११,२२,२३) स्रुवेणाश्वपदे" २१सू० । "मृत्संस्कारत्वादुपविश्येत्युच्यते, व्यतिषङ्गश्च एकस्याः पूर्वार्ध इतरार्धः इतरयोरप्येवमेव" क० । "अभ्र्या पिण्डं त्रिः परिलिखति परि वाजपतिरिति (११,२५,२७) बहिर्बहिरुत्तरयोत्तरयाभ्र्या पिण्डं खनति देवस्य त्वेति (११,२८) २२सू० । "अभ्रिग्रहणमभ्र्यन्तरनिवृत्त्यर्थम् तथा चाह "अत्र सा वैणव्यभ्रिरुत्सीदतीति "(६,५,४,३ शत०ब्रा० उत्तरया परया ऋचा पूर्वलिखिताद्बहिर्बहिर्बाह्यप्रदेशे परिलिखति"। क० "कृष्णाजिनमास्तीर्योत्तरतस्तस्मिन् पुष्करपर्णमपां पृष्ठमिति" (११,२९) २३सू० । "तस्मिन्कृष्णाजिने" क० । "विमार्ष्ट्येनद्दिव इति (११,२९) २४सू० । "पुष्करपर्णम्" क० "आलभत उभे शर्म्म च स्थइति"(११,३०३१) २५सू०। "उभे कृष्णाजिनपुष्करपर्णे, शक्यत्वाच्च युगपदालम्भनम्" क० । "पिण्डं पुरीष्योऽसीति (११,, ३२) । "२६ सू० 'आलभते" क०। "पाणिभ्यां परिगृह्णीत्येनं दक्षिणोत्तराभ्यां दक्षिणः साभ्रिस्त्वामग्नइति" (११,३२ ३८) । षड्भिः सर्वं सकृद्धृत्वा" २७सू० "ग्रहणे मन्त्रः "अथैनं परिगृह्णातीति" शत०ब्रा० (६,४,२,२) वचनात्"क० इति द्वितीया कण्डिका ।

"पुष्कतपर्णे निदधाति"१सू०। "अपः श्वभ्रेऽपवयत्यपो देवीरिति (११,३८)२सू० । 'श्वभ्रः पिण्डावटः" क० । सं तइति (११,२९) वा तमपक्षिपति "३सू० । 'श्वभ्रएव" क० । "अनामिकया संवपति पुरस्तात्पश्चाद्दक्षिणत उत्तरतश्च" ४सू० । "संवापश्चावटे पुरीषस्य" क० । "आस्तीर्णयोरन्तानुद्गृह्णाति सुजात इति"(११,४०) ५सू०। "अस्तीर्णयोः कृष्णाजिनपलाशपर्णयोः" क० । "बन्धनायोभयोः प्रान्तान् सर्वत ऊर्ध्वान् करोति"संग्र०। 'त्रिवृता मुञ्जयोक्त्रेणोपनह्यति वासोअग्नइति । (११,४०) ६सू० । "उद्गृहीतानन्तान्" क० । "उत्तिष्ठति पिण्डमादायोदु तिष्ठेति" (११,४१) ७सू० । "ऊर्ध्वबाहुः